Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
© 2024 SHISRRJ | Volume 7 | Issue 6
OPEN ACCESS
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# हिमाचलीय-लोकगाथासुसंस्कृतिसंस्कृतयोः मूलतत्त्वानि

**आचार्यः बृहस्पतिमिश्रः**
प्रोफेसर,संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)
**दलीपसिंहः**
शोधच्छात्र, संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)

**शोधसारः –** भारतस्य संस्कृतेः मूलं संस्कृतमेव । भाषावैज्ञानिकाः भारोपीय-भाषा-परिवारमूले अपि संस्कृतमेव मन्यन्ते । तथैव हिमाचलस्य लोकसंस्कृतेः लोकभाषाणां मूले च संस्कृतमेव । कस्याः अपि सभ्यतायाः परिचयः तस्याः पारम्परिक-साहित्यादेव भवति, तथा च साहित्यस्य अध्ययनेन भाषायाः परिज्ञानं भवति । हिमाचलस्य लोकसाहित्यपरम्परायां यानि विषयानि प्रतिपादितानि सन्ति तेषां मूले अपि संस्कृतपरम्परायाः निर्वहणं परिलक्ष्यते । लोकसाहित्ये अपि लोकगाथाः प्राचीनतमा भवन्ति । ताःऐतिहासिकाः भवन्ति । हिमाचलस्य एतासां लोकगाथानां विभाजनं त्रिधा भवति – देवगाथा, सिद्धगाथा,वीरगाथा (युद्धगाथा) च । तासां सर्वासां मौलिक-प्रतिपाद्याः विषयाः भाषा च संस्कृतमूला अस्ति ।

**कूटशब्दाः –** लोकगाथा, संस्कृतमूलकता, तत्समशब्दाः ,तद्भवशब्दाः, श्रुतकाव्यम्, लोकसाहित्यम् ।

---

**प्रस्तावना-** कस्याः अपि सभ्यतायाः परिचयः तस्याः पारम्परिक-साहित्यादेव भवति ।साहित्येन एव तस्याः सभ्यतायाः इतिहासस्य, परिवेशस्य परम्पराणां च परिज्ञानं भवति ।आरम्भिक-कालाद् एव हिमाचल-संस्कृत्यांलोकसाहित्यस्य हस्तान्तरणं श्रुतपरम्परयाःअभवत्[1]।"लोकसाहित्ये लोककथाः, गीतानि, लोकोक्त्याः, गाथाः,वार्ताः, नाटकानि च सम्मिलितानि भवन्ति, यानि वंशानुक्रमे प्रवाहमानानि भवन्ति"[2]।

**लोकगाथा** – हिमाचलस्य लोकसाहित्यस्य अन्यतमः प्रकारः अस्ति लोकगाथा ।लोकगाथा तादृशं काव्यं भवति, यस्य गायनंलोकोत्सवेषु, देवोत्सवेषु, च भवति । लोकगाथानां गायनसमये तालवाद्यैः सार्धं जनाःनृत्यमपि कुर्वन्ति । लोकगाथायां कस्यापि घटनायाः अथवा कस्यापि देवस्य, वीरपुरुषस्य वा जीवनचरितस्य सुदीर्घं वर्णनंभवति ।
शब्दकल्पद्रुमे अपि गाथायाः परिभाषा इत्थं प्रदत्ता – गाथा (स्त्री) (गीयते इति । गै गाने[3] + "उषिकुषिगर्त्तिभ्यस्थन् ।" उणा.- 2 । 4 । इति थन् स्त्रियां टाप्[4])। गेयम् । तच्च गीतम् ।[5]
हिमाचलस्य लोकसाहित्येलोकगाथाः त्रिधाः सन्ति । 1. देवगाथा 2. सिद्धगाथा 3. वीरगाथा च । एताः लोकगाथाः जनश्रुतिरूपेण लोके प्रचलन्ति ।

**हिमाचलीयलोकसाहित्यस्य प्रकाशनं प्रसारणं च -** हिमाचले एतासां लोकगाथानां प्रकाशनं प्रसारणञ्च स्वातन्त्र्योत्तरमेव अभवत् । प्रो. हरिरामजस्टामहोदयानुसारं "1955 ई.तमे शिमलानगरे आकाशवाण्याः स्थापनायाः

Copyright © 2024 The Author(s): This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY-NC 4.0)

अनन्तरं लोकगीतानां स्थानीयलोकभाषासु प्रसारणम् अभवत् । अप्रैल 1955 ई.तमेहिमाचललोकसम्पर्कविभागेन एकस्याः हिन्दी-साहित्यिक-पत्रिकायाः प्रकाशनम् आरब्धम् । 1965 ई.तमे त्रैमासिकयोः पर्वतीययोः (पहाड़ी) पत्रिकयोः द्वयोः "हिमभारती" तथा च 'सोमसी' इत्येतयोः प्रकाशनस्य आरम्भः अभवत् ।एतयोः पत्रिकयोः मूल-उद्देश्यंपर्वतीयाःभाषायाः, कलायाः अथवा संस्कृतिविषयक-लेखानां प्रकाशनं लेखकानां प्रोत्साहनं च आसीत्[6]। अर्थाद् एतासु पत्रिकासु हिमाचलीयलोकसाहित्येन सार्धं च यदाकदा लोकगाथानां प्रकाशनमपि अभवत् ।

कस्यापि समाजस्य लोकसंस्कृतेः, लोकसाहित्यस्य, लोकभाषायाः च मूलरूपम् तस्य लोकगीतेषु, लोककथासु, लोकभाषासु च विशुद्धरूपेण प्राप्यते । हिमाचलीयासु लोकसाहित्ये संस्कृतमूलकशब्दानां संस्कृतमूलक-प्रतिपाद्यविषयाणां च बाहुल्यम् अस्ति ।

यदि एतासां लोकगाथानामध्ययनम्अवधानेन क्रियते तर्हि एतासां साम्यता संस्कृतसाहित्येन सह दृश्यते । एतासां लोकगाथानां संस्कृतमूलकता द्विधा सिद्ध्यति ।

क. प्रतिपाद्यविषयदृष्ट्या

ख. संस्कृतमूलकशब्दप्रयोगदृष्ट्या

हिमाचलस्य लोकसंस्कृतेः आधारः सनातनसंस्कृतिः एव ।संस्कृतसाहित्ये ये विषयाः सन्ति तेषामेव लौकिकरूपं हिमाचलस्य लोकसाहित्ये प्राप्यते ।

**प्रतिपाद्यविषयदृष्ट्या**-हिमाचलस्य लोकगाथासु रामायणं,महाभारतं, भर्तृहरिगाथा (भरथरी), सृष्टि-उत्पत्तिगाथा (एंचळी - नुवाला)इत्यादयाः विषयाः प्रतिपादिताः सन्ति ।

किन्नौरजनपदस्य रामायणगाथायाः अंशः अत्र दीयते । अस्याः गाथायाः अंशे एतद् वर्णितमस्ति यद्राजादशरथेन सप्तर्षिसमीपम् उपवेश्य वर्षत्रयपर्यन्तम् अश्वमेधयज्ञं सम्पादितं येन तिस्रः राज्यः गर्भवत्यः अभवन् । अत्र प्रतिपाद्यविषयस्य सामीप्यं संस्कृतसाहित्येन सार्धं दृश्यते । कुत्रचित् सन्दर्भेषु वैभिन्न्यं तु भवति, परन्तु प्रतिपाद्यविषये साम्यता अस्ति एव ।

| हिमाचलीया /किन्नौरीलोकगाथायाः अंशः[7] | हिन्दी-रूपान्तरणम् | प्रतिपाद्यविषयस्य साम्यता (रामायणस्य पद्यांशाः) |
|---|---|---|
| सोन्तिगु ताईंसा ले सोन्तिगु ताईंस,<br>महाराजा दोशरोथा ले महाराजा दोशरोथ ।।1।।<br><br>महाराजा दोशरोथा ले महाराजा दोशरोथ,<br>साता रिखीयु ओमपी याले साता रिखीयु ओमपी ।2।<br>साता रिखीयु ओमपी याले साता रिखीयु ओमपी,<br>शुम बोशङ्तोशिसाले शुम बोशङ्तोशिस।3।<br><br>शुम बोशङ्तोशिसा ले शुम बोशङ्तोशिस,<br>अश्वमे याग लानो याले अश्वमे याग लानो।4। | सन्तान के लिए, सन्तान के लिए,<br>महाराजा दशरथ, महाराजा दशरथ।<br>महाराजा दशरथ, महाराजा दशरथ ।<br>सप्तर्षियों के समक्ष, सप्तर्षियों के समक्ष ।।2 ।।<br>सप्तर्षियों के समक्ष सप्तर्षियों के समक्ष ।<br>तीन वर्ष बैठकर, तीन वर्ष बैठकर ।।3।।<br>तीन वर्ष बैठकर, तीन वर्ष बैठकर ।<br>अश्वमेध यज्ञ कर रहे, अश्वमेध यज्ञ कर रहे ।।4।। | मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ।।[8]<br><br>ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ।।[9]<br>यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ।।[10](लोकगाथायां ऋष्यशृङ्ग स्थाने सप्त-ऋषीणाम् उल्लेखः अस्ति)<br><br>तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम |

| | | |
|---|---|---|
| अश्वमे याग लानो याले अश्वमे याग लानो,<br>महाराजा दोशरोथा ले महाराजा दोशरोथ ।5।<br><br>अश्वमे याग लन – लना ले अश्वमे याग लन – लन,<br>शुमी रानी गुरबिना ले, शुमी रानी गुरबिन ।।6।। | अश्वमेध यज्ञ कर रहे, अश्वमेध यज्ञ कर रहे,<br>महाराजा दशरथ, महाराजा दशरथ ।।5।।<br>अश्वमेध यज्ञ करके, अश्वमेध यज्ञ करके ।।<br>तीनों रानियाँ गर्भवती (हुई), तीनों रानियाँ गर्भवती (हुई)।।6।। | ।।[11]<br>ततस्तु राजा प्रसमीक्ष्य ताः स्त्रियः,<br>प्ररूढगर्भाः प्रतिलब्धमानसः ।<br>बभूव हृष्टस्त्रिदिवे यथा हरिः<br>सुरेन्द्रसिद्धर्षिगणाभिपूजितः ।।[12] |

सिरमौर,शिमला,सोलन जनपदेषु “महाभारत” इति लोकगाथायाः गायनं नृत्यसभायां भवति । लोके महाभारतं भारोत, भार्थावा इत्यपि कथ्यते । महाभारतस्य लोकगाथायां अर्जुन-विषादयोगस्य वर्णनं श्रीमद्भगवद्गीतायां वर्णितश्लोकानुरूपम् अस्ति ।

| हिमाचली/सिरमौर-सोलन-शिमलाजनपदानां लोकगाथायाः अंशः | हिन्दी-अनुवादः | प्रतिपाद्यविषयस्य साम्यता(श्रीमद्भगवद्गीतायाःश्लोकांशाः) |
|---|---|---|
| अर्जुन – ओ कृष्णा, कोरी देणा खोड़ा रे रथ मेरा मैदानों दा ।<br>रथो पोईदा ओरजुणो बाहिरो के पोड़ा रे ।<br>रोथो दी तेनिये बाहिरी, नजरो थेयी पायी रे ।<br>कौरु- भाई रो आपणे, जुधीणो रोहे आयी रे ।<br><br>बातो लांव ला कृष्णा, ओरजुणो आंव गाढी रे<br><br>धनुषो बाणो आपणे अधमो दिते छाडी रे । | हे कृष्ण मेरा रथ, युद्ध के मैदान में खडा कर दो ।<br><br>रथ से अर्जुन बाहर आ गया<br>बाहर आकर चारों ओर देखने लगा ।<br>युद्ध के लिए आये अपने कौरव भाईयों को देखने लगा ।<br><br>अर्जुन को दुखी (विह्वल) देखकर, श्री कृष्ण कहने लगे ।<br><br>अपने धनुष-बाण को बीच मैदान में छोड़ दिया । | सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत[13] ।।<br><br>तान्समीक्ष्य सः कौन्तेयः सर्वान्बन्धूनवस्थितान् [14]।।<br>दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।[15]।<br><br>तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम् ।<br>विषीदन्तमिदं वाक्यमुवाच मधुसूदनः [16]।।<br>एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।<br>विसृज्य सशरं चापं शोकसंविग्नमानसः [17]।।01/47।। |

| | | |
|---|---|---|
| | | |

हिमाचलप्रदेशस्य अनेकेषु क्षेत्रेषु सृष्टिप्रक्रियाविषयकः वृतान्तः वेदपुराण-उपनिषदादिषु वर्णितवृत्तान्तसमम् एव वर्तते । चम्बाजनपदे जलबिम्बीगाथा, शिमलाजनपदे बलिराज (बरलाज) गाथा, काङ्गड़ाजनपदे ऊंकार (ॐकार) स्तुति, इत्यादिषु सृष्टिरचनायाः इतिहासवर्णनम् संस्कृतवाङ्मयाधारितमेव वर्तते । चम्बाजनपदस्य इयं जलबिम्बिगाथा काङ्गड़ा, हमीरपुर, बिलासपुरादिषु जनपदेषु किञ्चिद् वैविध्येन गीयते । ऋग्वेदस्य नासदीय-सूक्ते अयं सिद्धान्तः मूलरूपेण अस्ति । अस्य सिद्धान्तस्य अनया लोकगाथया सह समानता स्पष्टतया दृश्यते ।

चम्बाजनपदस्य-जलबिम्बिगाथायाः अंशः -

| लोकगाथायाः अंशः | हिन्दी - अनुवादः | प्रतिपाद्यविषयस्य साम्यता/ नासदीयसूक्तम् |
|---|---|---|
| न थिया धरती न थिया गासा,<br>न थिया मेरु, कैलासा हां<br><br>न थिया पौण न थिया पाणी<br>न थिया सूरजा न थिया चन्द्रमा<br><br>न थिये नौलख तारे हां<br>जलबिम्बी जलबिम्बी<br>घोर निहारा हां, इक हुंकार लेया अवतार[18]। | न धरती थी न आकाश था,<br>न सुमेरु पर्वत था न कैलाश था ।<br><br>न पवन था न ही जल था,<br>न सूरज था न चन्द्र था ।<br><br>न नौ लाख तारे थे,<br>सब ओर जल ही जल था ।<br><br>सब ओर गहन अन्धकार था,<br>परमेश्वर की ऊंकार (ॐकार) ध्वनि का प्रादुर्भाव हुआ । | **नासदासीन्नो सदासीत्तदानीं नासीद्रजो नोव्योमा परोयत्।**<br>**किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद् गहनंगभीरम् ॥१॥**<br>**न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।**<br>**आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥२॥**<br>**तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।**<br>**तुच्छयेनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्॥३॥**[19] |

**संस्कृतमूलकशब्दाः प्रयोगदृष्ट्या-**

हिमाचलस्य संस्कृते वीरदेवतानाम् इतिहासः गाथारूपेण गीयते । हिमाचले यन्त्र-मन्त्र-तन्त्रेण सह अपि वीरदेवतानां सम्बन्धः वर्तते । तेषु गाथासु मन्त्रेषु च ये शब्दाः प्रयुक्ताः भवन्ति, तेषां समीपता संस्कृतेन सह वर्तते ।अत्र शुंकू, जूंझी च वीरयोः विषये एकः लोकमन्त्रः अत्र प्रदीयते।

| लोकगाथा | हिन्दी-अनुवाद | संस्कृतमूलकशब्दसमम् |
|---|---|---|

| | | |
|---|---|---|
| एक ताई, दूई ताई, त्राई ताई...<br>एक छटांक पाणी, दूई छटांक भूत...<br>त्रासी सिद्ध चौऊ कनारे री खबर लेई ।<br>दोऊ दोषे री कार पाई।<br>शुंकू वीर जौखान पूरी प्रथम पूरी री खबर लेई।<br>जूंझी वीर खार समुद्र पार डियाई।<br>डाकणी शाकणी वे भस्म कराई, नौ लाख तारे री दुहाई[20]। | एक के लिए, दो के लिए, तीन के लिए,<br>एक छटांक (5 सेर) जल<br>दो छटांक भूत<br>तिरयासी सिद्ध, चार दिशाओं का समाचार लिया ।<br>दो दोष की समय-सीमा निश्चित की ।<br>शुंकु वीर नेजौखानपुरी का पता लिया ।<br>जूंझी वीर खारे समुद्र पार गया ।<br>वहां डाकिनी, शाकिनीयों को भस्म करके नो लाख तारों को मुक्त किया । | एक = एकः, दूई = द्वौ, त्राई = त्रयः, छटांक = एक सेर इति परिमाणस्य षोडषांशः[21], पाणी = पानीयं, भूत = भूतम्[22], त्रासी = त्र्याशीतिः, सिद्ध =सिद्धः[23], चौऊ = चतुः, दोषे (री) = दोषस्य, वीर = वीरः, प्रथम = प्रथमः, समुद्र = समुद्रः, पार = पारम्, डियाई = डीयते[24]। डाकणी =डाकिनी[25], शाकणी = शाकिनी[26], भस्म = भस्म, नौ = नव, लाख = लक्षम्, तारे = तारकानि । |

देवालयेषु ब्रह्ममुहूर्तपूजासमये यः तालः वाद्यते सः "चौघड़ी[27]"(चतुर्थीघट्टिका इति चतुर्घटिका) इति कथ्यते। तस्मिन् समये पूजनाय तालवाद्यैः सहपूजकः देवगाथां गायति ।तासां देवगाथानां शब्दरचना संस्कृतमूलकशब्दसमम्अस्ति ।

| लोकगाथायाः अंशः | संस्कृतमूलकशब्दसमम् |
|---|---|
| जागे रे जागे हो, जागन करे हो, ब्रह्मा भी जागे, विष्णु भी जागे<br>जागे अष्ट करोड़ी देवता हो, जागन करे हो[28]। | जागे = जागृयात्, जागन = जागरणम्, करे= कुरु, ब्रह्मा = ब्रह्मा, अष्ट= अष्ट, करोड़ी = कोटि, देवता = देवता । |

सृष्टिव्यवस्थाविषयिका मण्डीजनपदस्य एकस्याः लोकगाथायाः अंशः अपि द्रष्टव्यः।

| लोकगाथायाः अंशः | हिन्दी अनुवाद | संस्कृतमूलकशब्दसमम् |
|---|---|---|
| पन्द्रह तिथी कृष्ण-शुक्ला किती।<br>नौग्रह देवते बणाये,गणपति गणाधिराज बनाये।<br>बारह महीने, बारह महीने री एक बौर्ष बणाई।<br>एकसा बरशेरी चार रिती बणाई। | शुक्ला और कृष्णा तिथियाँ की,<br>नवग्रह देवता बनायें, गणपति गणाधिराज बनायें ।<br>बारह महिने हुए, बारह महीनों का एक वर्ष बनाया ।<br>एक वर्ष की चार ऋतुएं बनाई । | शुक्लपक्षस्यपञ्चदशतिथयः,<br>कृष्णपक्षस्य पञ्चदशतिथयः च।<br>नौग्रह = नवग्रहाः<br>गणपति = गणेशः<br>गणानाम् अधिराजः = गणाधिराजः।<br>द्वादशमासाः , द्वादशमासानाम् एकं |

| | | |
|---|---|---|
| | | वर्षं कृतम् ।<br>एकस्य वर्षस्य चत्वारः ऋतवः कृताः । |

निष्कर्षः- अनेन प्रकारेण सिद्ध्यति यद् हिमाचलीयासु लोकगाथासु (लोकभाषासु) वर्णित-विषयेषु मतान्तरं तु अस्ति एव परञ्च प्रतिपाद्यविषयस्य साम्यता वर्तते । व्याकरणसंरचनायां कारकेषु वैभिन्न्यम् अस्ति । शब्दानां मूले संस्कृतशब्दाः एव सन्ति । कुत्रचित् सिद्धान्तेषु अपि वैभिन्न्यम् अस्ति यथा "एकसा बरशेरी चार रिती बणाई"(एकस्य वर्षस्य चत्वारः ऋतवः कृताः) ।तथापि हिमाचलस्य लोकसाहित्यस्य मौलिकताविषये संस्कृतस्य आधारःस्पष्टतया दृश्यते ।

**अनुशीलितसंदर्भ-ग्रन्थसूचिः**


01. ऋग्वेदसंहिता , परोपकारिणी सभा,अजमेर,1987 ई0 (नासदीयसूक्तम्)https://sa.wikisource.org/wiki/%E0%A4%8B%E0%A4%97%E0%A5%8D%E0%A4%B5%E0%A5%87%E0%A4%A6%E0%A4%83%E0%A4%B8%E0%A5%82%E0%A4%95%E0%A5%8D%E0%A4%A4%E0%A4%82%E0%A5%A7%E0%A5%A6.%E0%A5%A7%E0%A5%A8%E0%A5%AF
02. शब्दखोजhttps://dict.hinkhoj.com/%E0%A4%9B%E0%A4%9F%E0%A4%BE%E0%A4%82%E0%A4%95-meaning-in-english.words
03. श्रीवामनशिवराम आप्टे
04. अष्टाध्यायी https://ashtadhyayi.com/
05. धातुपाठः https://ashtadhyayi.com/dhatu/
06. माधवीया धातुवृत्तिः, सायणाचार्यः, तारा बुक एजेन्सी, कामाच्छा, वाराणसी, ई.2000
07. उणादिकोषः (पञ्चपादी), राम लाल कपूर ट्रस्ट,रेवली, सोनीपत, हरियाणा, ई.2010
08. मेदिनीकोषः, चौखम्बा संस्कृत संस्थान ,वाराणसी, ई.2018
09. महाभारतम्, गीताप्रेस, गोरखपुर, उ. प्र.,भारत, 2045वि॒
10. श्रीमद्भागवतपुराण, गीताप्रेस, गोरखपुर, उ. प्र.
11. अमरकोश, पण्डित शक्तिधरशास्त्री, प्रकाशक - मुंशी नवलकिशोर (सी.आई. ई.) ई.1975
12. शब्दकल्पद्रुम,स्यार-राजा-राधाकान्तदेव-बाहादुरेण विरचितः, चौखम्बा संस्कृत ग्रन्थमाला, ई.1967
13. वाल्मीकिरामायणम् , अनुवादक - चतुर्वेदी द्वारकाप्रसाद शर्मा, प्रकाशक- रामनारायण लाल पब्लिशर और बुकसेलर इलाहबाद 1927, ई.2000
14. श्रीमद्भगवद्गीता (साधारण भाषा टीका सहित), गीताप्रेस, गोरखपुर - 273005,
15. संस्कृत-हिन्दी-कोष- श्रीवामनशिवराम-आप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि. दिल्ली, ई.1989

16. छन्दोमञ्जरी, चौखम्बा कृष्णदास अकादमी, वाराणसी-221002
17. हिमाचललोकसाहित्ये श्रुतकाव्य-परम्परा - दिलीप वसिष्ठ - वेदाञ्जलि, An International Peer Reviewed Refereed Research Journal वर्ष -9, अंक- 17, भाग- 2, जनवरी - जून 2022 । ISSN: 2349-364X
18. हिमाचल की देव-भार्थाएं, अक्षरधाम प्रकाशन, करनाल रोड़, कैथल - 136027 (हरि.), ई.2013,
19. हिमाचल के लोक-नृत्य, सन्मार्ग प्रकाशन 16, यू. बी. वैंग्लो रोड़ दिल्ली - 7, ई.1978,
20. हिमाचलप्रदेश रामकथा के लोकप्रसंग, संपादक - सुदर्शन वसिष्ठ, डॉ. विद्याचन्द ठाकुर, हिमाचल कला संस्कृति भाषा अकादमी, क्लिफ - एण्ड एस्टेट शिमला 171001,
21. इतिहास लेखन में लोकगाथाओं का योगदान, संपादक - आचार्य ओम प्रकाश शर्मा, प्रकाशक- इतिहास शोध संस्थान नेरी, हमीरपुर (हि. प्र.) - 177001)ई.2021,
22. हिमाचल की लोक कलाएं और आस्थाएं, प्रकाशक - राष्ट्रीय पुस्तक न्यास, भारत, नेहरु भवन, 5 इंस्टीट्यूशनल एरिया, फेज - II, ई.2008

---

1.वेदाञ्जलि(An International Peer Reviewed Refereed Research), पृ. सं. -186

2.हिमाचल की देव-भार्थाएं,पृ. सं. 22-23

3.शब्दकल्पद्रुमे (पृ. 322) गाथा-शब्द: गै गाने इति गानार्थकाद् धातो: निष्पन्न: स्वीक्रियते किन्तु पाणिनीयधातुपाठे गै शब्दे (1-1065) इति शब्दात्मक: अर्थ: निर्दिश्यते तत्र आचार्य: सायण: माधवीयधातुवृत्तौ (1-642) - इह शब्द: शब्दविशेष:, उक्तं चैव क्षीरस्वामी इत्युक्त्वा गै शब्दस्य अर्थं शब्दविशेषं प्रमाणयति। स: चार्थ: गानमपि भवितुमर्हति। तथा तु गा स्तुतौ (3-26) धातो: अपि गाथा-शब्द: सिद्ध्यति

4.शब्दकल्पद्रुम: - गाथा , स्त्री, (गीयते इति । गै गाने + "उषिकुषिगर्त्तिभ्यस्थन् ।" उणां । २ । 4 । इति थन् स्त्रियां टाप् ।) श्लोक: ।

5.गाथा-शब्द: पूर्वं गेयार्थे, गीतार्थे श्लोकार्थे वा आसीत्यथामहाभारते "गाथा च गीतिका चापि तस्य सम्पद्यते नृप! (महाभारतम्- 3-5-30)तथा च गाथा-शब्द:आख्यानार्थे अपि प्रयुज्यते स्म यथा - द्विजोपसृष्ट: कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथा: (भागवद्पुराणम् - 1-19-15), नाराशंसीगाथा, "कदा वाहेयिका गाथा: पुनर्गास्यामि शाकले" (महाभारतम् - 8.44.26), लघुषु पद्येषु सरलतया विस्तारपूर्वकं कथितं प्रभावोत्पादिका कथा यस्यां प्राय: सत्यानां घटनानां वर्णनम् अस्ति। यथा - आल्हा इति एका वीरस्य गाथा अस्ति।धात्वर्थोपि एष: एव यथा स्वामिदयानन्दसरस्वतीवर्य: गाथा-शब्दस्य धात्वर्थयुक्तम् अर्थं लिखति - गीयते या सा गाथा, वाग्भेद: श्लोको वा (उणादिकोष: 2-4) किन्तु तदनन्तरं गाथा-शब्द: संस्कृतान्यभाषाया: प्राकृतभाषाया: कृते तथा च छन्दो विशेषस्य कृते अपि प्रयुक्त: अभवत् ('गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयो:, वृत्तम् तत्तु अक्षरसंख्यातं पद्यम्' -मेदिनीकोष:), यथा छन्दोमञ्जरी-ग्रन्थे गाथा-वृत्तस्य लक्षणं - 'पादे द्वादश विषमे मात्रा: अष्टादश द्वितीये हि । पञ्चदश चेत् तुरीये कथिता गाथा तथैवार्या ॥'

श्रीवामनशिवराम आप्टे लिखति - तद् वृत्तं यद् वैदिकछन्द:सु न स्यादिति।

6.हिमाचल के लोक-नृत्य- पृ.सं. 51

7.हिमाचलप्रदेश रामकथा के लोकप्रसंग -पृ.सं.-16

8.मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ।
तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ।। वा.रा.,बालकाण्डम् – 12-8 ।।
9.तं च राजा दशरथो यष्टुकामः कृताञ्जलिः।
ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ।। वा.रा.,बालकाण्डम् – 11-8 ।।
10.लभते च स तं कामं द्विजमुख्याद्विशांपतिः ।
यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ।। वा.रा.,बालकाण्डम् – 11-9 ।।
11.मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ।
तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ।। वा.रा.,बालकाण्डम् – 12/8।।
12.ततस्तु राजा प्रसमीक्ष्य ताः स्त्रियः,प्ररूढगर्भाः प्रतिलब्धमानसः ।
बभूव हृष्टस्त्रिदिवे यथा हरिःसुरेन्द्रसिद्धर्षिगणाभिपूजितः ।। वा.रा.,बालकाण्डम् – 16/ 32
13.सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ।
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।।श्रीमद्भगवद्गीता– 1/21
14.तत्रापश्यत्स्थितान्पार्थः पितृनथ पितामहान्।
आचार्यान्मातुलान्भ्रातृन्पुत्रान्पौत्रान्सखींस्तथा ।।श्रीमद्भगवद्गीता– 1-26
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्।।श्रीमद्भगवद्गीता– 1-27
15.दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।।श्रीमद्भगवद्गीता– 1-28
16.तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ।।श्रीमद्भगवद्गीता– 2-01।
17.एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः।। श्रीमद्भगवद्गीता– 1-47।
18.इतिहास लेखन में लोकगाथाओं का योगदान ,पृ.सं. -13
19.नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम् ।।1।।
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ।।ं।।
तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छयेनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्।।3।।
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा।।4।।
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी3दुपरि स्विदासी3त्।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात्।।5।।
को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।

अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूवा॥।
इयं विसृष्टिर्यत आबभूव यदि वा दध यदि वा न।
यो अस्याध्यक्ष: परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद॥ॐ॥ऋग्वेद: 10-129

20.हिमाचल की लोक कलाएं और आस्थाएं- पृ. सं. -147।

21. Definition of छटांकस्त्री0 [सं0 षट्+टंक;>छटंक>छटांक] 1. एक तौल जो 5 तोले अर्थात् सेर के 16 वें.भाग के बराबर होती है। 2. उक्त तौल का बटखरा ।
https://dict.hinkhoj.com/%E0%A4%9B%E0%A4%9F%E0%A4%BE%E0%A4%82%E0%A4%95-meaning-in-english.words

22.भूत-(नपुंसकलिङ्ग:) -देवयोनि:, विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नरा: । पिशाचो गुह्यक: सिद्धो भूतोऽमी देवयोनय: ॥ अमरकोश:- 1.1.11

समानार्थका: – विद्याधर अप्सरस् यक्ष रक्षस् गन्धर्व किन्नर पिशाच गुह्यक सिद्ध भूत

23.सिद्ध-(पुंलिङ्ग:)देवयोनि:, विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नरा: । पिशाचो गुह्यक: सिद्धो भूतोऽमी देवयोनय: ॥ अमरकोश:- 1.1.11

24.पाणिनीयधातुपाठे 04.0030 (कौमुदीधातु:- 1135) डीङ् विहायसा गतौ (दिवादि: आत्मनेपदी अकर्मक: सेट् स्वादि: )

25.डाकिनी , स्त्री, (डाय भयदानाय अकति कुटिलं व्रजतीति । अक वक्रगतौ + इनि: । ततो ङीप् ।) कालीगणविशेष: ,शब्दकल्पद्रुमे

26.शाकिनी , स्त्री, (शाकोऽस्त्यत्रेति । शाक + इनि: ।दुर्गाया अनुचरीविशेष: । यथा, "डाकिनी योगिनी चैवखेचरी शाकिनी तथा । शब्दकल्पद्रुमे

27.रात्रे: चतुर्थे प्रहरे देवपूजन-समयेवावाद्यमान: ताल:।चौघड़ी अर्थात् एक घण्टा 36 मिनट (एक घण्टे में ढाई घड़ी, एक घड़ी = 24 मिनटX4=96 मिनट) प्रात:काल ब्राह्ममुहूर्त में चारघड़ी तक वाद्ययन्त्रों की तालों के साथ देवपूजन किया जाता है । उसे चौघड़ी कहा जाता है ।

28.हिमाचल की लोक कलाएं और आस्थाएं ,पृ. सं. -99